# ArchajyotiSham

# આર્ચજ્યોતિષમ્

## Document Information

Text title : aarchajyotisha

File name : aarchajyotiSha.itx

Category : jyotisha, sociology_astrology

Location : doc_z_misc_sociology_astrology

Transliterated by : Sanjay Prabhakaran sanjaychettiar at gmail.com

Proofread by : Sanjay Prabhakaran sanjaychettiar at gmail.com

Latest update : May 21, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# આર્ચજ્યોતિષમ્

પંચસંવત્સરમયં યુગાધ્યક્ષં પ્રજાપતિમ્ ।
દિનર્ત્વયનમાસાંગં પ્રણમ્ય શિરસા શુચિઃ ॥ ૧॥

પ્રણમ્ય શિરસા કાલમભિવદ્ય સરસ્વતીમ્ ।
કાલજ્ઞાનં પ્રવક્ષ્યામિ લગધસ્ય મહાત્મનઃ ॥ ૨॥

જ્યોતિષામયનં પુણ્યં પ્રવક્ષ્યામ્યનુપૂર્વશઃ ।
વિપ્રાણાં સમ્મતં લોકે યજ્ઞકાલાર્થ સિદ્ધયે ॥ ૩॥

નિરેકં દ્વાદશાભ્યસ્તં દ્વિગુણં ગતસંજ્ઞિકમ્ ।
ષષ્ટ્યા ષષ્ટ્યા યુતં દ્વાભ્યાં પર્વણાં રાશિરુચ્યતે ॥ ૪॥

સ્વરાક્રમેતે સોમાર્કૌ યદા સાકં સવાસવૌ ।
સ્યાત્તદાદિયુગં માઘસ્તપઃ શુક્લોઽયનં હ્યુદક્ ॥ ૫॥

પ્રપદ્યતે શ્રવિષ્ઠાદૌ સૂર્યાચન્દ્રમસાવુદક્ ।
સાર્પાર્ધે દક્ષિણાર્કસ્તુ માઘશ્રાવણયોઃ સદા ॥ ૬॥

ધર્મવૃદ્ધિરપાં પ્રસ્થઃ ક્ષપાહ્રાસ ઉદગ્ગતૌ ।
દક્ષિણે તૌ વિપર્યાસઃ ષણ્મુહૂર્ત્યયનેન તુ ॥ ૭॥

દ્વિગુણં સપ્તમં ચાહુરયનાદ્યં ત્રયોદશ ।
ચતુર્થં દશમં ચૈવ દ્વિર્યુગ્મં બહુલેપ્યૃતૌ ॥ ૮॥

વસુસ્ત્વષ્ટા ભવોઽજશ્ચ મિત્રઃ સર્પોઽશ્વિનૌ જલમ્ ।
ધાતા કશ્ચાયનાદ્યાઃ સ્યુરર્ધપંચમભસ્ત્વૃતુઃ ॥ ૯॥

ભાંશાઃ સ્યુરષ્ટકાઃ કાર્યાઃ પક્ષા દ્વાદશકોદ્ગતાઃ ।
એકાદશગુણશ્ચોનઃ શુક્લેઽર્ધં ચૈન્દવા યદિ ॥ ૧૦॥

કાર્યા ભાંશાષ્ટકાસ્થાને કલા એકાન્નવિંશતિઃ ।
ઊનસ્થાને ત્રિસપ્તતિમુદ્વપેદૂનસમ્મિતાઃ ॥ ૧૧॥

ત્ર્યંશો ભશેષો દિવસાંશભાગશ્ચતુર્દશસ્યાપ્યપનીય ભિન્નમ્ ।
ભાર્ધેઽધિકે ચાધિગતે પરેંઽશેદ્યાવુક્તમેકં નવકૈર્ભવેદ્યઃ ॥ ૧૨॥

પક્ષાત્પંચદશાચ્ચોર્ધ્વં તદ્ભુક્તમિતિ નિર્દિશેત્ ।
નવભિસ્તૂદ્ગતોંઽશઃ સ્યાદૂનાંશદ્વ્યધિકેન તુ ॥ ૧૩॥

જૌ દ્રા ગઃ ખે શ્વે હી રો ષા શ્ચિન્મૂષક્ણ્યઃ સૂમાધાણઃ ।
રે મૃ ઘાઃ સ્વાપોજઃ કૃષ્યો હ જ્યેષ્ઠા ઇત્યૃક્ષા લિંગૈઃ ॥ ૧૪॥

જાવાદ્યશૈઃ સમં વિદ્યાત્ પૂર્વાર્ધે પર્વ સૂત્તરે ।
ભાદાનં સ્યાચ્ચતુર્દશ્યાં કાષ્ઠાનાં દેવિના કલાઃ ॥ ૧૫॥

કલા દશ સવિંશા સ્યાદ્ દ્વે મુહુર્તસ્ય નાડિકે ।
દ્યુસ્ત્રિંશંત્ તત્કલાનાં તુ ષટ્શતી ત્ર્યધિકા ભવેત્ ॥ ૧૬॥

નાડિકે દ્વે મુહુર્તસ્તુ પંચાશત્પલમાઢકમ્ ।
આઢાકાત્કુમ્ભાકોદ્રોણઃ કુટપૈર્વર્ધતે ત્રિભિઃ ॥ ૧૭॥

સસપ્તકં ભયુક્ સોમઃ સૂર્યો દ્યૂનિ ત્રયોદશ ।
નવમાનિ ચ પંચાહ્નઃ કાષ્ઠાઃ પંચાક્ષરા ભવેત્ ॥ ૧૮॥

શ્રવિષ્ઠાભ્યો ગણાભ્યસ્તાન્ પ્રાગ્વિલગ્નાન્ વિનિર્દિશેત્ ।
સ્તર્યાન્ માસાન્ ષડભ્યસ્તાન્ વિદ્યાચ્ચાન્દ્રમસાનૃતૂન ॥ ૧૯॥

અતીતપર્વભાગેભ્યઃ શોધયેદ્ દ્વિગુણાં તિથિમ્ ।
તેષુ મંડલભાગેષુ તિથિનિષ્ઠાંગતો રવિઃ ॥ ૨૦॥

યાઃ પર્વાભાદાનકલાસ્તાસુ સપ્તગુણાં તિથિમ્ ।
પક્ષિપેત્તત્ સમૂહસ્તુ વિદ્યાદાદાનિકાઃ કલાઃ ॥ ૨૧॥

યદુત્તરસ્યાયનતો ગતં સ્યાચ્ છેષં તથા દક્ષિણતોઽયનસ્ય ।
તદેકષષ્ટ્યાદ્વિગુણં વિભક્તં સદ્વાદશં સ્યાદ્ દિવસપ્રમાણમ્ ॥ ૨૨॥

યદર્ધં દિનભાગાનાં સદા પર્વણિ પર્વણિ ।
ઋતુશેષં તુ તદ્ વિદ્યાત્ સંખ્યાય સહ પર્વણામ્ ॥ ૨૩॥

ઇત્યુપાયસમુદ્દેશો ભૂયોપ્યહ્નઃ પ્રકલ્પયેત્ ।
જ્ઞેયરાશિં ગતાભ્યસ્તં વિભજેજ્જ્ઞાનરાશિના ॥ ૨૪॥

અગ્નિઃ પ્રજાપતિઃ સોમો રુદ્રોદિતિબૃહસ્પતી ।
સર્પાશ્ચ પિતરશ્ચૈવ ભગશ્ચૈવાર્યમાપિ ચ ॥ ૨૫॥

સવિતા ત્વષ્ટાથ વાયુશ્ચેન્દ્રાગ્ની મિત્ર એવ ચ ।
ઇન્દ્રો નિઋતિરાપો વૈ વિશ્વેદેવાસ્તથૈવ ચ ॥ ૨૬॥

વિષ્ણુર્વસવો વરુણૂડજેકપાત્ તથૈવ ચ ।
અહિર્બુધ્ન્યસ્તથા પૂષા અશ્વિનૌ યમ એવ ચ ॥ ૨૭॥

નક્ષત્રદેવતા એતા એતાભિર્યજ્ઞકર્મણિ ।
યજમાનસ્ય શાસ્ત્રજ્ઞૈર્નામ નક્ષત્રજં સ્મૃતમ્ ॥ ૨૮॥

ઇત્યેવં માસવર્ષાણાં મુહુર્તોદયપર્વણામ્ ।
દિનર્ત્વયનમાસાંગં વ્યાખ્યાનં લગધોઽબ્રવીત્ ॥ ૨૯॥

સોમસૂર્યસ્તૃચરિતં વિદ્વાન્ વેદવિદશ્નુતે ।
સોમસૂર્યસ્તૃચરિતં લોકં લોકે ચ સમ્મતિમ્ ॥ ૩૦॥

વિષુવં તદ્ગુણં દ્વાભ્યાં રૂપહીનં તુ ષડ્ગુણમ્ ।
યલ્લબ્ધં તાનિ પર્વાણિ તથાર્ધં સા તિથિર્ભવેત્ ॥ ૩૧॥

માઘશુક્લપ્રપન્નસ્ય પૌષકૃષ્ણસમાપિનઃ ।
યુગસ્ય પંચવર્ષસ્ય કાલજ્ઞાનં પ્રચક્ષતે ॥ ૩૨॥

તૃતીયાં નવમીં ચૈવ પૌર્ણમાસીમથાસિતે ।
ષષ્ઠિ ચ વિષુવાન્ પ્રોક્તો દ્વાદશીં ચ સમં ભવેત્ ॥ ૩૩॥

ચતુર્દશીમુપવસથસ્તથા ભવેદ્યથોદિતો દિવસમુપૈતિ ચન્દ્રમાઃ ।
મઘશુક્લાહ્નિકો ભુઙ્ક્તે શ્રવિષ્ઠાયાં ચ વાર્ષિકીમ્ ॥ ૩૪॥

યથા શિખા મયૂરાણાં નાગાનાં મણયો યથા ।
તદ્વદ્વેદાંગશાસ્ત્રાણાં જ્યૌતિષં મૂર્ધાનિ સ્થિતમ્ ॥ ૩૫॥

વેદ હિ યજ્ઞાર્થમભિપ્રવૃત્તાઃ કાલાનુપૂર્વ્યા વિહિતાશ્ચ યજ્ઞાઃ ।
તસ્માદિદં કાલવિધાનશાસ્ત્રં યો જ્યોતિષં વેદ સ વેદ યજ્ઞાન્ ॥ ૩૬॥

॥ ઇતિ આર્ચજ્યોતિષં સમાપ્તમ્ ॥

Encoded and proofread by
Sanjay Prabhakaran sanjaychettiar at gmail.com

*ArchajyotiSham*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*